# हारीतसंहितायां सूचीपत्रम् ।


| | | | |
|---|---|---|---|
| **प्रथमस्थानम्** | | उत्तमवयः | १६ |
| वैद्यगुणवर्णनशास्त्रपठनविधिः | १ | हीनवयः | १७ |
| चिकित्साशास्त्रसंग्रहः | ४ | प्रकृतिज्ञानम् | १७ |
| शल्यतन्त्रलक्षणम् | ५ | वातप्रकृतिः | १७ |
| शलाक्यतन्त्रलक्षणम् | ५ | पित्तप्रकृतिः | १८ |
| कायचिकित्सातन्त्रलक्षणम् | ५ | कफप्रकृतिः | १८ |
| बालचिकित्सातन्त्रलक्षणम् | ६ | समप्रकृतिः | १८ |
| अगदलक्षणम् | ६ | अष्टदिक्प्रवृत्तोवायुः | १८ |
| विषतन्त्रलक्षणम् | ६ | वस्त्रवायुः | १९ |
| भूतविद्यातन्त्रलक्षणम् | ६ | वेणुवायुः | १९ |
| रसायनतन्त्रलक्षणम् | ६ | तालपत्रवायुः | १९ |
| वाजीकरणतन्त्रलक्षणम् | ६ | व्यजनवातगुणाः | २० |
| उपाङ्गचिकित्सालक्षणम् | ६ | दिनमध्ये षट्ऋतूपचारः | २० |
| वैद्यशिष्यविधानो नाम | ७ | दोषाणां वायुकोपशमः | २० |
| आनूपलक्षणम् | १० | वायुप्रकोपः | २१ |
| जाङ्गलदेशलक्षणम् | १० | पित्तकोपस्य निदानम् | २२ |
| साधारणदेशलक्षणम् | ११ | कफप्रकोपः | २२ |
| कालज्ञानम् | ११ | द्वन्द्वजानां समुद्भवः | २३ |
| ऋतुचर्य्या | १२ | सन्निपातोत्पत्तिः | २३ |
| ऋतुलक्षणम् | १३ | षट्रसाः | २३ |
| वर्षा ऋतुः | १३ | एते रसा एतेषां दोषाणां विरुद्धाः | २३ |
| शरदुपचारः | १४ | एते दोषाणां दोषकराः | २४ |
| हेमन्तोपचारः | १४ | षण्णां रसानां रसवीर्य्यम् | २४ |
| शिशिरोपचारः | १५ | मधुरवीर्य्यम् | २४ |
| वसन्तोपचारः | १५ | तिक्तवीर्य्यम् | २४ |
| ग्रीष्मोपचारः | १५ | कटुकवीर्य्यम् | २५ |
| पञ्चमोऽध्यायः | १६ | अम्लरसवीर्य्यम् | २५ |
| वयोज्ञानम् | १६ | कषायरसवीर्य्यम् | २५ |
| मध्यमवयः | १६ | क्षारवीर्य्यम् | २५ |

| | |
|---|---|
| जलवर्गः | २५ |
| गाङ्गोदकगुणाः | २६ |
| सामुद्रोदकगुणाः | २६ |
| श्रावणवृष्टिगुणाः | २७ |
| भाद्रवृष्टिगुणाः | २७ |
| आश्विनवृष्टिगुणाः | २७ |
| कार्त्तिकवृष्टिगुणाः | २७ |
| चतुर्विधं जलम् | २८ |
| कारकजलगुणाः | २८ |
| तुषारपानीयगुणाः | २८ |
| हैमपानीयगुणाः | २९ |
| नदीवारिगुणाः | २९ |
| औद्भिदादिवारिगुणाः | २९ |
| प्रस्रवणवारिगुणाः | २९ |
| चौण्ड्योदकवारिगुणाः | २९ |
| वाप्युदकगुणाः | ३० |
| कूपोदकगुणाः | ३० |
| तडागोदकगुणाः | ३० |
| सरोवरवारिगुणाः | ३० |
| सपाषाणनदीवारिगुणाः | ३० |
| सवालुकनदीवारिगुणाः | ३० |
| नद्यः उत्तरागुणाः | ३१ |
| भूमिभागजलगुणाः | ३१ |
| पापोदकगुणाः | ३२ |
| रोगोदकगुणाः | ३३ |
| अंशूदकगुणाः | ३३ |
| आरोग्योदकम् | ३३ |
| उष्णोदकगुणाः | ३४ |
| क्षीरवर्गः | ३५ |
| गोपयोगुणाः | ३७ |
| अजापयोगुणाः | ३७ |
| मेषीपयोगुणाः | ३७ |
| महिषीपयोगुणाः | ३७ |
| उष्ट्रीपयोगुणाः | ३७ |
| नारीपयोगुणाः | ३७ |
| प्राभातिकक्षीरगुणाः | ३७ |
| दिनक्षीरगुणाः | ३७ |
| क्षीरपानविधिः | ३८ |
| गवां दधिगुणाः | ३८ |
| आजदधिगुणाः | ३८ |
| माहिषदधिगुणाः | ३८ |
| आविकदधिगुणाः | ३८ |
| शारददधिगुणाः | ३८ |
| हैमन्तदधिगुणाः | ३९ |
| शैशिरदधिगुणाः | ३९ |
| वासन्तदधिगुणाः | ३९ |
| ग्रैष्मिकदधिगुणाः | ३९ |
| वार्षिकदधिगुणाः | ३९ |
| दधिवर्जनम् | ३९ |
| दधिभोजनविधिः | ४० |
| गव्यतक्रगुणाः | ४० |
| माहिषतक्रगुणा | ४० |
| छागीतक्रगुणाः | ४० |
| त्रिविधतक्रगुणाः | ४० |
| कुत्र कुत्र तक्रं निषिद्धम् | ४१ |
| कुत्र कुत्र तक्रं पथ्यतमम् | ४१ |
| नवनीतविधिः | ४१ |
| फेनविधिः | ४२ |
| गव्यघृतम् | ४२ |
| अजघृतम् | ४२ |
| माहिषघृतम् | ४२ |
| उष्ट्रीघृतम् | ४२ |
| आविकघृतम् | ४३ |
| अश्वीघृतम् | ४३ |

| | |
|---|---|
| नारीघृतम् | ४३ |
| क्षीरोद्भवघृतम् | ४३ |
| जीर्णघृतगुणाः | ४३ |
| मूत्रवर्गः | ४४ |
| गोमूत्रगुणाः | ४४ |
| अजमूत्रम् | ४४ |
| मेषमूत्रम् | ४४ |
| माहिषमूत्रम् | ४४ |
| गजमूत्रम् | ४४ |
| अश्वमूत्रम् | ४४ |
| औष्ट्रमूत्रम् | ४५ |
| गर्दभमूत्रम् | ४५ |
| नरमूत्रम् | ४५ |
| प्रसूताप्रसूतमूत्रगुणाः | ४५ |
| इक्षुवर्गः | ४५ |
| श्वेतेक्षुगुणाः | ४५ |
| कृष्णेक्षुगुणाः | ४६ |
| यन्त्रोद्भवरसगुणाः | ४६ |
| दन्तनिष्पीडितरसगुणाः | ४६ |
| पर्य्युषितरसगुणाः | ४६ |
| पक्वरसगुणाः | ४६ |
| फाणितरसगुणाः | ४६ |
| गुडगुणाः | ४६ |
| मत्स्यण्डीगुणाः | ४७ |
| खण्डगुणाः | ४७ |
| शर्करागुणाः | ४७ |
| तण्डुलोदकगुणाः | ४७ |
| तुषोदकगुणाः | ४८ |
| यवगोधूमकाञ्जिकगुणाः | ४८ |
| युगन्धराम्लगुणाः | ४८ |
| काञ्जिकपरिहारः | ४८ |
| धान्यमण्डगुणाः | ४८ |
| युगन्धरमण्डगुणाः | ४९ |
| रक्तशालिमण्डगुणाः | ४९ |
| श्वेततण्डुलमण्डगुणाः | ४९ |
| यवमण्डगुणाः | ४९ |
| गोधूममण्डगुणाः | ४९ |
| कोद्रवमण्डगुणाः | ४९ |
| क्षुद्रधान्यमण्डगुणाः | ४९ |
| यूषवर्गः | ४९ |
| कुलत्थयूषगुणाः | ४९ |
| आढकीयूषगुणाः | ४९ |
| मुद्गयूषगुणाः | ५० |
| मसूरयूषगुणाः | ५० |
| चणकयूषगुणाः | ५० |
| माषयूषगुणाः | ५० |
| तैलवर्गः | ५० |
| तिलतैलगुणाः | ५० |
| सार्षपतैलगुणाः | ५१ |
| अतसीतैलगुणाः | ५१ |
| एरण्डतैलगुणाः | ५१ |
| सहकारतैलगुणाः | ५१ |
| कौसुम्भतैलगुणाः | ५१ |
| वसागुणाः | ५२ |
| धान्यवर्गः | ५२ |
| शालिवर्गः | ५४ |
| क्षुद्रधान्यम् | ५३ |
| यवगुणाः | ५४ |
| गोधूमगुणाः | ५४ |
| चणकगुणाः | ५४ |
| माषगुणाः | ५४ |
| मुद्गगुणाः | ५४ |
| आढकीगुणाः | ५४ |
| मुकुष्टकगुणाः | ५५ |

| | | | |
|---|---|---|---|
| कुलत्थगुणाः | ५५ | सुरावर्गः | ६३ |
| मसूरगुणाः | ५५ | मांसवर्गः | ६५ |
| त्रिपुटगुणाः | ५५ | एनमांसगुणाः | ६६ |
| निष्पावगुणाः | ५५ | चित्राङ्गगुणाः | ६६ |
| कलायगुणाः | ५५ | किङ्करगुणाः | ६६ |
| शाकवर्गः | ५६ | रोहितगुणाः | ६६ |
| कूष्माण्डगुणाः | ५७ | गण्डगवयादिमांसगुणाः | ६७ |
| कालिङ्गगुणाः | ५७ | शूकरमांसगुणाः | ६७ |
| चिचिण्डगुणाः | ५७ | शशकमांसगुणाः | ६७ |
| चिर्भटगुणाः | ५८ | शल्लकमांसगुणाः | ६७ |
| पटोलगुणाः | ५८ | गोधामांसगुणाः | ६७ |
| एर्वारुगुणाः | ५८ | मूषकमांसगुणाः | ६७ |
| त्रपुषगुणाः | ५८ | स्थलचरपक्षिमांसवर्गः | ६७ |
| अलाबुगुणाः | ५८ | लावकमांसगुणाः | ६७ |
| तुण्डिकाकर्कोटकगुणाः | ५८ | तित्तिरिमांसगुणाः | ६८ |
| कारवेल्लगुणाः | ५८ | नीलमयूरमांसगुणाः | ६८ |
| कोशातकीगुणाः | ५८ | द्वितीयमयूरगुणाः | ६८ |
| हल्लाकगुणाः | ५८ | कुक्कुटमांसगुणाः | ६८ |
| कन्दशाकवर्गः | ५९ | कपोतमांसगुणाः | ६८ |
| फलवर्गः | ५९ | चकोरशुकसारिकामांसगुणाः | ६९ |
| बीजपूरगुणाः | ६० | क्रौञ्चमांसगुणाः | ६९ |
| निम्बुकगुणाः | ६० | कोकिलमांसगुणाः | ६९ |
| अम्लिकाफलगुणाः | ६१ | पापीहकमांसगुणाः | ६९ |
| द्राक्षागुणाः | ६१ | गृहचटकमांसगुणाः | ६९ |
| नारिकेलगुणाः | ६१ | जलचरमांसवर्गः | ६९ |
| कदलीफलद्वयगुणाः | ६१ | जलचरपक्षिमांसगुणाः | ६९ |
| कपित्थफलगुणाः | ६१ | मकरमांसगुणाः | ७० |
| खर्जूरगुणाः | ६२ | मत्स्यमांसगुणाः | ७० |
| पूगफलगुणाः | ६२ | कच्छपमांसगुणाः | ७० |
| ताम्बूलगुणाः | ६२ | कुलीरगुणाः | ७० |
| सखदिरताम्बूलगुणाः | ६२ | भोजनवर्गः | ७१ |
| मधुवर्गः | ६२ | युगन्धरभक्तगुणाः | ७१ |

| | |
|---|---|
| यवागूगुणाः | ७१ |
| मण्डगुणाः | ७२ |
| पायसगुणाः | ७२ |
| कृशरागुणाः | ७२ |
| सूपगुणाः | ७२ |
| खलगुणाः | ७२ |
| दाडिमाम्लगुणाः | ७२ |
| पर्पटगुणाः | ७२ |
| शिण्डाकीगुणाः | ७३ |
| वटिकागुणाः | ७३ |
| शिखरिणीगुणाः | ७३ |
| सीधुगुणाः | ७३ |
| मद्यगुणाः | ७२ |
| मांसगुणाः | ७३ |
| भरितागुणाः | ७३ |
| अङ्गारमण्डगुणाः | ७३ |
| अल्पाणमण्डगुणाः | ७३ |
| पूरिकागुणाः | ७४ |
| पूपकगुणाः | ७४ |
| सोमालिकागुणाः | ७४ |
| फेणीगुणाः | ७४ |
| भिन्नवटकगुणाः | ७४ |
| अभिन्नवटकगुणाः | ७४ |
| मोदकगुणाः | ७५ |
| यवपोलिकागुणाः | ७५ |


## द्वितीय स्थानम् ७७


| | |
|---|---|
| पापदोषप्रतीकारः | ७९ |
| स्वप्नाध्यायः | ८१ |
| अरिष्टाध्यायः | ८३ |
| व्याध्यरिष्टाध्यायः | ८९ |
| नक्षत्रहोमविधिः | ९३ |
| दूतपरीक्षाध्यायः | ९५ |
| शकुनाध्यायः | ९६ |


## अथ चिकित्सास्थानम् ९८


| | |
|---|---|
| भेषजपरिज्ञानविधिः | ९८ |
| लङ्घनीयाः | १०० |
| लङ्घनयोग्याः | १·१ |
| ज्वराध्यायः | १०५ |
| ज्वरकारणम् | १०७ |
| ज्वरचिकित्सा | १०९ |
| वातज्वरचिकित्सा | ११० |
| पित्तज्वरचिकित्सा | १११ |
| श्लेष्मज्वरचिकित्सा | ११२ |
| वातपित्तज्वरचिकित्सा | ११३ |
| पित्तश्लेष्मज्वरचिकित्सा | ११३ |
| आरग्वधपञ्चकम् | ११४ |
| क्षुद्राद्यं पाचनम् | ११४ |
| वातकफज्वरचिकित्सा | ११५ |
| त्रिदोषचिकित्सा | ११५ |
| सन्निपातज्वरलक्षणम् | ११६ |
| दशाङ्गक्वाथः | ११६ |
| बृहत्यादिपाचनम् | ११६ |
| शठ्यादिपाचनम् | ११७ |
| बृहद्रास्नादि | ११७ |
| लघुरास्नादि | ११८ |
| त्रिवृतादिमलभेदनः | ११८ |
| सन्निपातस्वेदोद्धूलनम् | ११८ |
| नस्यविधानम् | ११८ |
| प्रधमनविधिः | ११८ |
| नेत्राञ्जनविधिः | ११८ |

| | | | |
|---|---|---|---|
| निष्ठीवनविधिः | ११९ | शोफचिकित्सा | २३७ |
| कर्णमूलविधिः | १२० | जलोदरचिकित्सा | २३९ |
| तृतीयकज्वरलक्षणम् | १२३ | प्रमेहचिकित्सा | २४० |
| निदिग्धिकादिः | १२४ | खटिकामेहचिकित्सा | २४३ |
| अष्टाङ्गधूपः | १२५ | मूत्रकृच्छ्रचिकित्सा | २४४ |
| ज्वरमन्त्रः | १२६ | मूत्ररोगचिकित्सा | २४५ |
| चातुर्वर्ण्यरूपज्वराणां चिह्नानि | १२६ | अश्मरीरोगचिकित्सा | २४७ |
| अतीसारचिकित्सा | १२९ | वृषणवृद्धिचिकित्सा | २४८ |
| गुल्मचिकित्सा | १४० | विसर्पचिकित्सा | २५० |
| क्रिमिचिकित्सा | १४९ | उपसर्गचिकित्सा | २५१ |
| मन्दाग्निचिकित्सा | १५२ | व्रणचिकित्सा | २५३ |
| अरोचकचिकित्सा | १५४ | श्लीपदार्बुदचिकित्सा | २५६ |
| शूलचिकित्सा | १५५ | लूतागण्डमालाचिकित्सा | २५७ |
| पाण्डुरोगचिकित्सा | १६३ | कुष्ठचिकित्सा | २५९ |
| क्षयरोगचिकित्सा | १६६ | शिरोरोगचिकित्सा | २६५ |
| रक्तपित्तचिकित्सा | १७८ | भ्रूदोषचिकित्सा | २६८ |
| अर्शोरोगचिकित्सा | १८७ | नासारोगचिकित्सा | २६९ |
| कासचिकित्सा | १९८ | इन्द्रलुप्तचिकित्सा | २७० |
| छर्दिलक्षणम् | २०३ | कर्णरोगचिकित्सा | २७१ |
| छर्दिचिकित्सा | २०४ | नेत्ररोगचिकित्सा | २७२ |
| तृष्णातालुशोषचिकित्सा | २०६ | पुष्पचिकित्सा | २७३ |
| मूर्च्छाचिकित्सा | २०९ | मुखरोगचिकित्सा | २७५ |
| तन्द्राचिकित्सा | २१२ | ओष्ठरोगचिकित्सा | २७५ |
| मदात्ययचिकित्सा | २१३ | दन्तरोगचिकित्सा | २७५ |
| दाहचिकित्सा | २१५ | जिह्वापाकप्रतीकारः | २७६ |
| अपस्मारचिकित्सा | २१६ | घण्टिकारोगचिकित्सा | २७७ |
| उन्मादचिकित्सा | २२० | गलशुण्डिकाचिकित्सा | २७७ |
| वातव्याधिचिकित्सा | २२१ | वृद्धस्त्रीणां वाजीकरणम् | २७८ |
| आमवातचिकित्सा | २३१ | वन्ध्योपक्रमः | २८० |
| गृध्रसीचिकित्सा | २३५ | गर्भाचारः | २८३ |
| वातरक्तचिकित्सा | २३६ | चलितगर्भचिकित्सा | २८४ |
| अम्लपित्तचिकित्सा | २३७ | गर्भोपद्रवचिकित्सा | २८४ |

मूढगर्भचिकित्सा २८६
मृतगर्भस्य लक्षणम् २८६
प्रसवोपायमन्त्रौषधानि २८७
सूतिकोपचारः २८८
क्षीरवृद्धिकरणम् २८८
बालचिकित्सा २९०
उत्फुल्लिकाचिकित्सा २९०
बालानां प्रज्ञाकरणम् २९१
बालानां वाक्पटुत्वकरणम् २९२
बालानां पूतनादोषः २९२
भूतविद्या २९४
विषतन्त्रम् २९७
मुखसिञ्चनमन्त्रः २९८
कर्णे जपमन्त्रः २९८
विषघ्नमन्त्रौषधानि २९८
जङ्गमविषचिकित्सा २९९
विषबन्धनमन्त्रः २९९
छिन्नचिकित्सा ३०१
भिन्नचिकित्सा ३०१
शल्योद्धारचिकित्सा ३०२
भग्नचिकित्सा ३०३
दुष्टचिकित्सा ३०४
आस्फालितचिकित्सा ३०४
अभिघातचिकित्सा ३०४
अग्निदग्धचिकित्सा ३०५


## कल्पस्थानम्


हरीतकीकल्पः ३०६
त्रिफलाकल्पः ३०९
रसोनकल्पः ३११
गग्गुलुकल्पः ३१३


## सूत्रस्थानम् ३१५


तुलामानविधिः ३१५
तैलपाकविधिः ३१७
निरूहवस्तिकर्मविधिः ३१८
स्वेदविधिः ३१८
रक्तावसेचनविधिः ३१९
जलौकाविधिः ३२०
शारीराध्यायः ३२१
परिशिष्टाध्यायः ३२७

# हारीतसंहिता ।

## प्रथमोऽध्यायः ।

RMIC LIBRARY
Acc No
Class
Checked

हिमवदुत्तरे कूले सिद्धर्षिगणसेविते ।
शान्तमृगगणाकीर्णे नानापादपशोभिते ॥
तत्रस्थं तपसा युक्तं तरुणादित्यतेजसम् ।
शुद्धस्फटिकवच्छुभ्रं भूतिभूषितविग्रहम् ॥
जटाजूटाटवीमौलिं भासितं शुभ्रकुन्तलैः ।
आत्रेयं बहुशिष्यैश्च राजितं तपसान्वितम ।
पप्रच्छ शिष्यो हारीतः सर्वज्ञानमिदं महत् ॥

हारीत उवाच ।

भगवन् ! करुणाधार ! आयुर्वेदविदां वर ! ।
विनयादविनीतोऽहं पृच्छामि मुनिपुङ्गव ! ॥
कथं रोगसमुत्पत्तिः उत्पन्नो ज्ञायते कथम् ।
उपचारोऽपचारश्च कथं वा सिद्धिमृच्छति ॥
एतत्सम्यक् परिज्ञानं कथयस्व महामुने ! ॥
एवं पृष्टो महाचार्य्यो हारीतेन महात्मना ।
प्रत्युवाच ऋषिः शिष्यं प्रहस्योत्फुल्ललोचनः ॥

आत्रेय उवाच ।

शृणु पुत्र ! महाप्राज्ञ ! सर्वशास्त्रविशारद ! ।
चिकित्साशास्त्रकुशल ! वैद्यविद्याविचक्षण ! ॥

आयुर्वेदोऽपार एव श्लोकानां लक्षसंख्यया।
कथं तस्य परिज्ञानं कालेनाल्पेन पुत्रक!॥
अल्पायुषोऽल्पवक्तारः स्वल्पशास्त्रविशारदाः।
अल्पावधारणे शक्ताः कलौ जाता इमे नराः॥
अल्पं कलियुगञ्चेदं नरोपद्रवकारणम्।
कथं पुत्र! प्रवक्ष्यामि विस्तरेण तवागमम्॥
श्रवणे यस्य कालोऽयं याति चान्तश्च पुत्रक!।
तस्माच्चाल्पतरेणापि वक्ष्यामि शृणु साम्प्रतम्॥
चतुर्विंशसहस्रैस्तु मयोक्ता चाद्यसंहिता।
तथा द्वादशसाहस्री द्वितीया संहिता मता॥
तृतीया षट्सहस्रैस्तु चतुर्थी त्रिभिरेव च।
पञ्चमी द्विकपञ्चशतैः प्रोक्ताः पञ्चात्र संहिताः॥
तस्माच्चाल्पतरेणापि वक्ष्यामि शृणु पुत्रक!।
येन विज्ञानमात्रेण भवेच्च गदवेदवित्॥
किमत्र बहुनोक्तेन चाल्पसारेण पुत्रक!।
तेन धर्मार्थसौख्यं च तद्धि कर्म समाचरेत्॥
येन सञ्जायते श्रेयो येन कीर्त्तिर्महत्सुखम्।
तत्कर्म नितरां श्लाघ्यं ज्ञानानन्दविधायकम्॥

एकं शास्त्रं वेद्यमध्यात्मकं वा
सौख्यं चैकं यत्सुखं वा तपो वा।
वन्द्यश्चैको भूपतिर्वा यतिर्वा
एकं कर्म श्रेयसं वा यशो वा॥
बहुतरमुपचारात् सारमादाय लोके
जननमपि सुखानां वर्द्धनं श्रेयसां वा।
विगतकलुषभावश्चोज्ज्वलत् कीर्त्तिमूर्त्ति-
र्न खलु कुटिलभावः पूज्यते लोकवृन्दैः॥

वर्ज्याः पञ्चैव पाठे तु मुनिभिः परिकीर्त्तिताः॥
आहवे जीवसम्पाते प्रदोषे वायवा पुनः।
राष्ट्रपीड़ासमुत्पन्ने न कुर्य्याच्छास्त्रपाठनम्॥
अकाले दुर्दिने गर्जे दिग्दाहे भूमिकम्पने।
शास्त्रपाठस्तथा वर्ज्यो ग्रहणे चन्द्रसूर्य्ययोः॥
गुरुपीड़ासमुत्पन्ने नृपे संपीड़ितेऽथवा॥
द्वादशैते ह्यनध्यायाः प्रोक्ताः शृणुष्व पुत्रक!।
एतेषु पठितं शास्त्रं न स्वार्थे सिद्धिसाधकम्।
न श्रेयसे न माङ्गल्ये नोपकारे सुखावहम्॥
एवं ज्ञात्वा पठति निपुणो वैद्यविद्यानिधानं
श्रेयस्तस्य प्रतिदिनमसौ वाञ्छितार्थः प्रसिध्येत्।
तस्मात् सौख्यं भवति नितरां कीर्त्तिलोकप्रशंसा।
पूज्यो राज्ञां सततमपि वै जायते स्वार्थसिद्धिः॥

इति आत्रेयभाषिते हारीतोत्तरे वैद्यगुणवर्णनशास्त्रपठनविधिर्नाम प्रथमोऽध्यायः।

---

## द्वितीयोऽध्यायः।

आत्रेय उवाच।

अथातः संप्रवक्ष्यामि शास्त्रस्यास्य समुच्चयम्।
आयुर्वेदसमुत्पत्तिं सर्वशास्त्रार्थसंग्रहम्॥
अष्टौ चात्र चिकित्साश्च तिष्ठन्ति भिषजां वर!।
ता वक्ष्यामि समासेन चिकित्साश्च पृथक् पृथक्॥
संग्रहेऽथ प्रवक्ष्यामि प्रथमं चान्नपानकम्।
अरिष्टं च द्वितीयं स्यात्तृतीयं च चिकित्सितम्॥
कल्पं चतुर्थकं प्रोक्तं सूत्रस्थानन्तु पञ्चमम्।
षष्ठं चात्र शरीरं स्यादित्यायुर्वेदकारकाः॥

कोष्ठामयानां शमनी क्रिया कायचिकित्सिता ॥

इति कायचिकित्सातन्त्रम्।

गर्भोपक्रमविज्ञानं सूतिकोपक्रमस्तथा।
बालानां रोगशमनं क्रिया बालचिकित्सितम् ॥

इति बालचिकित्सातन्त्रम्।

गुदामयवस्तिरुजं शमनं वस्तिरुक्कम्।
आस्थापनानुवासन्तु अगदं नाम एव च ॥

इति अगद नाम।

सर्पवृश्चिकलूतानां विषोपशमनी तु या।
सा क्रिया विषतन्त्रञ्च नाम प्रोक्तं मनीषिभिः ॥

इति विषतन्त्रम्।

ग्रहभूतपिशाचाश्च शाकिनीडाकिनीग्रहाः।
एतेषां निग्रहः सम्यक् भूतविद्या निगद्यते ॥

इति भूतविद्यातन्त्रलक्षणम्।

देहस्येन्द्रियजातानां दृढीकरणमेव च।
वलीपलितखालित्यवर्जनेऽपि च या क्रिया।
पूर्ववैद्यप्रणीतं हि तद्रसायनमुच्यते ॥

इति रसायनतन्त्रम्।

इति अष्टाङ्गवैद्यकम्।

क्षीणानां चाल्पवीर्य्याणां वृंहणं बलवर्द्धनम्।
तर्पणं सप्तधातूनां वाजीकरणमुच्यते ॥

इति वाजीकरणतन्त्रम्।

छिन्नं भिन्नं तथा भग्नं क्षतं पिच्चितमेव च।
दग्धं तेषां प्रतीकारः प्रोक्तश्चोपाङ्गसंज्ञकः ॥

इति उपाङ्गचिकित्सा।

इति वैद्यकसर्वस्वं चिकित्सागमभूषणम्।
पठित्वा तु सुधीः सम्यक् प्राप्नोति सिद्धिसङ्गमम्।

इति वैद्यकसर्वस्वे चिकित्सासम्पत्ती नाम द्वितीयोऽध्यायः।

---

## तृतीयोऽध्यायः।

अथ वक्ष्यामि रोगाणामुपचारक्रमं तथा।
जानाति यो बुधः सम्यक् पूज्यते स नृपोत्तमैः॥
ज्ञात्वा रोगसमुत्पत्तिं रोगाणामप्युपक्रमम्।
स्वकार्य्यकुशलो वैद्यस्तस्य कुर्य्यात् प्रतिक्रियाम्॥
देशं कालं वयो वह्निं सात्म्यं प्रकृतिभेषजे।
देहं सत्वं बलं व्याधिं दृष्ट्वा कर्म समाचरेत्॥
धर्मार्थकामलाभः स्यात् सम्यगातुरसेवनात्।
तदनाचरतस्तस्य विनाशश्चात्मनस्तथा॥
व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः॥
द्विविधोपक्रमश्चैव शमनः कोपनो रुजाम्।
तमेव ज्ञात्वा विबुधः क्रियां कुर्य्याद्विचक्षणः॥
वैद्योऽपि द्विविधो ज्ञेयो विकारज्ञोऽथरोगजित्।
उपचारापचारज्ञो द्विविधः प्रोच्यते भिषक्॥
उपचारेण शमनमपचारेण कोपनम्।
एवं विज्ञाय सद्वैद्यः कुर्य्यात् संशमनीं क्रियाम्॥
साध्योऽसाध्यश्च याप्यश्च कृच्छ्रसाध्यस्तथैव च।
व्याधिश्चतुर्विधः प्रोक्तः सद्वैद्यैः शास्त्रकोविदैः॥
अपचारेण साध्याऽपि रोगा गच्छन्ति याप्यताम्।
याप्यास्त्वसाध्यतां यान्ति साध्याः कष्टेन पुत्रक!॥

सम्भवन्ति महारोगाः कष्टसाध्या भवन्ति ते।
एवं चतुर्विधं व्याधिं ज्ञात्वा कर्म समाचरेत्॥
उपचारकृता दोषाः कृच्छ्रास्ते यान्ति याप्यताम्।
याप्याः साध्यत्वमायान्ति कष्टसाध्यं भवेद्ध्रुवम्॥
सुखसाध्ये सुखी शीघ्रं स्यात् सुधीभिरुपक्रमैः।
साध्यासाध्यपरिज्ञानं ज्ञात्वोपक्रमणं तथा॥
साध्यभूतो यदा रोगो दोषशेषं न धारयेत्।
दोषशेषेऽपि कष्टं स्यात्तस्माद्यत्नान्निवर्त्तयेत्॥
यथाहिः काले दुष्टः स्यात् यथा सूक्ष्मोऽग्निजः कणः।
स्वल्पस्तद्वत् क्रियाऽप्राप्तो गदो घोरतरो भवेत्॥
तथा दोषस्य शेषस्तु न शमं याति चाल्पशः।
दैवात् तद्दुष्टतां याति यथाग्निः कुपितो भृशम्॥
यथा काष्ठचयं प्राप्य भवेत् घोरतरोऽग्निकः।
तथापथ्यस्य संयोगात् भवेत् घोरतरो गदः॥
कषायैश्च शतैश्चूर्णैः पिण्डलेहानुवासनैः।
सर्वाः क्रिया भृशं व्यर्था न शमं याति चामयः॥
एवं ज्ञात्वा सदा वैद्यो रोगशान्तिककारणम्।
कर्त्तव्यं मतियोगेन येन रोगः प्रशाम्यति॥
ज्ञात्वा दोषबलं धीमान् लङ्घनानि समाचरेत्।
दोषे सति न दोषाय लङ्घनानि बहून्यपि॥
पचेत् प्रथममाहारं दोषानाहारसंक्षये।
दोषक्षयेऽनलो धातून् प्राणान् धातुक्षये सति॥
ज्ञात्वा बलाबलं व्याधेः सामं निराममेव च।
चरेत् सामे पाचनं स्यान्निरामे पथ्यसंक्रमः॥
सामं निराममथ साध्यमसाध्यमेव
सम्यक् रुजश्च परिलक्ष्य रुजां विनाशम्।

एतद्भवेत् सकलवैद्यकशास्त्रसारं
नैवायुषश्च बलदानकरो हि वैद्यः॥
नो वैद्यो मनुजस्य सौख्यमथवा दुःखञ्च दातुं क्षमो
जन्तोः कर्मविपाक एव भुवने सौख्याय दुःखाय च।
तस्मान्मानवदुःखकारणरुजां नाशेषु चात्र क्षमो
वैद्योऽयं च सुधाब्धिधाम चतुरो नाम्नैव वैद्योऽपरः॥
सम्यक् रुजां परिज्ञानं ज्ञात्वा दोषविनिग्रहम्।
प्रत्याख्येयश्च यः साध्यं जानाति स भवेत् भिषक्॥
तपस्वी च ब्राह्मणश्च स्त्रियो वा बालकस्तथा।
दीनो वा दुर्बलो वापि प्राज्ञो वा पण्डितस्तथा॥
महात्मा श्रोत्रियः साधुरनाथो बन्धुवर्जितः।
एतान् व्याधिविनिग्रस्तान् प्रतिकुर्य्याद्विशेषतः॥
राजा च सुधनी चैव माण्डलीको बलाधिपः।
उपचार्य्योऽर्थसिद्धिः स्याद्वित्तं ग्राह्यं भयं न च॥
मध्यमो वणिजां श्रेष्ठः पुरोधा ब्राह्मणादयः।
भट्टो वा गणिकागुण्यो चिकित्स्यास्तु विशेषतः।
रोगग्रस्तेषु चैतेषु चिकित्सा कीर्त्तिकारिणी॥
व्याधश्चौरस्तथा म्लेच्छो वह्निदो मत्स्यबन्धकः।
बहुद्वेषी ग्रामकूटो बन्धको मांसविक्रयी।
एतेषां व्याधिग्रस्तानां नैव कुर्य्यात् प्रतिक्रियाम्॥
एतेभ्यः स्वार्थसिद्धिर्नो नोपकारोऽथ मङ्गलम्।
तेषां जीवातुसन्दानात् वैद्यो भवति दोषभाक्॥
एवं ज्ञात्वा तु सद्वैद्यः कुर्य्यादथ प्रतिक्रियाम्।
धर्मार्थकामसम्पत्तिः कीर्त्तिर्लोके प्रवर्त्तते॥
इति बहुविधियुक्तः वैद्यविद्याविचारः
क्षणमपि हृदये यो धारणं संकरोति।

तथा त्रयोऽन्येऽपि ज्ञेया उदयन्मध्यास्तरूपिणः ॥

इति कालज्ञानम्।

अथ ऋतुचर्य्या ।

वर्षा शरच्च हेमन्तः शिशिरश्च वसन्तकः ।
ग्रीष्मश्चेति क्रमादेते ऋतवः एवं षट् प्रकीर्त्तिताः ॥
पृथक् पृथक् प्रवच्यामि रवेर्गतिविशेषतः ।
प्रकोपं शमनं ज्ञात्वा अयने द्वे स्मृते बुधैः ॥
दक्षिणायनमेकं स्यात् द्वितीयं चोत्तरायणम् ।
वर्षा शरच्च हेमन्तो दक्षिणायनमध्यगाः ॥
शिशिरश्च वसन्तोऽपि ग्रीष्मः स्यादुत्तरायणे ।
याम्ये गतिर्यदा भानोस्तदा चान्द्रगुणा मही ॥
वारि शीतलसम्भूतं शीतं तत्र प्रजायते ।
बलिनो मधुरास्तिक्ताः कषायास्तु विशेषतः ॥
जीवानां मात्रमुत्तुल्यमोषधीनां च वीर्य्यतः ।
आर्द्रत्वं भूधराणाञ्च दिशश्चाप्यतिशीतलाः ।
सक्लेदा पृथिवी सर्वा तस्मादार्द्रकफोल्वणा ॥
कथञ्चित् शारदे पित्त कोप यातो विलीयते ।
तस्मादृतुविपर्य्यासादुपचारेण शाम्यति ॥
यदोदीच्यां गतिर्भानोस्तदा सूर्य्यो बलाधिकः ।
तस्मादुष्णगुणास्तीव्राः सम्भवन्ति विदाहिनः ॥
खरसूर्य्यांशुजालैस्तु शुष्यते तेन काननम् ।
संशुष्का मेदिनी सर्वा दिशः पर्णादिसङ्कुलाः ॥
बलिनोऽम्लकटुक्षाराः सम्भवन्ति विदाहिनः ।
तस्मात् संकुप्यते पित्तं रक्तेन सह मूर्च्छितम् ॥
ओषधिरसः संशुष्को गोजातीनां पयांसि च ।
अल्पं बलं च जन्तूनां कथञ्चित् कफसम्भवः ॥

दृश्यते वै वसन्ते च स्वयमेव समं व्रजेत्।
एवं ज्ञात्वा सुधीः सम्यक् कुर्य्यात् सर्वां प्रतिक्रियाम्॥

अथ ऋतुलक्षणम्।

सघनवारिदवारिसमाकुला निखिलभूः प्रवलोदकपूरिता।
समदवातकरा विदिशो दिशः प्रमुदितकृमिकीटभृता मही॥
नीलशस्यहरितोज्ज्वला मही कुल्यका सलिलसंप्लुता सरित्।
इन्द्रगोपकराजिविराजिता पङ्कभूषणविभूषिता धरा॥
उद्भिज्जपूर्णास्तरुभूधराश्च रम्यं वनं वा मधुरं विकूजति।
भृङ्गा मयूरा जलदस्य घोषः सर्वेऽपि जीवा बलमाप्नुवन्ति॥
केकी कूजति कानने च सरसी स्नानाम्बुपूर्णा तथा
हंसा मानसमाव्रजन्ति कमलान्यम्लानतां यान्ति च।
गर्जन्मेघमहेन्द्रकन्दरदरी शस्यावृता श्यामला
भात्येवं पवनस्य कोपनकरो वर्षाऋतुः शोभितः॥
किञ्चित् घर्मो भवेदत्र शस्यानां दृढ़ता भवेत्।
बहुशस्या भवेद्धात्री वारिपूर्णा सरिन्मुहुः॥
नद्यः पूर्णाम्भसोत्खातशीर्णपातास्तटद्रुमाः।
कुल्याप्रस्रवणानान्तु स्रवत्यम्भो दिशो दशः॥
बहूदकधरा मेघा बहुवृष्टा घनस्वनाः।
एवंगुणसमायुक्ता वर्षा ज्ञेया ऋतूत्तमा॥
तस्यां वातकफौ दुष्टौ जायेते च नृणां भृशम्।
इति ज्ञात्वा भिषक्श्रेष्ठः कुर्य्यात्तस्य प्रतिक्रियाम्॥
स्वेदनं मर्दनं पथ्यं निर्वाते शयनं तथा।
गौररामारतं शस्तं व्यायामः क्रमविक्रमः॥
कटुक्षारसुरसाः सेव्याः वातकफापहाः।
निरूहा वस्तिकर्माद्याः कफवातरुजापहाः॥

इति वर्षाऋतुः।

बहुलशिशिरधारा किञ्चिदुद्भूतशस्या
भवति वसुमतीयं पक्कशस्यैस्तु पीता।
कथमपि तुहिने स्यात् श्लेष्मणः सञ्चयस्तत्
पवनकफविकारो जायते शैशिरे च॥
गौराराममतमतिशय्येनावृणाम्यम्बराणि
सेव्यं तिक्तं कटुकलवणं प्रायशो ह्यम्लमेव।
स्वेदोद्भूदं प्रतिदिनमिदं कारयेदव सम्यक्
नाशं चातोऽनिलकफगदो याति तस्य प्रकोपः॥

इति शिशिरोपचारः।

मुदितकोकिलकूजितकाननं मदनसूचककिंशुकशोभितम्।
कुसुमसौरभरञ्जितभूधरं क्कणितमत्तमधुव्रतलालसम्॥
मकरकेतनवाणसमाकुलं मुदितमेव समस्तमिदं जगत्।
मलयमारुत उष्णगुणान्वितः कफकरो हि वसन्त ऋतुर्भवेत्॥
कफजकोपविनाशनानलं वमननावनरूक्षनिषेवणम्॥
विविधः सुरतानन्दः संभ्रमः कफवारणः।
कटुक्षाराम्लकाः सेव्याः शोधनं कफसम्भवे।
व्यायामश्रमसंरोधखिन्नो विश्रान्तमानसः॥
एवं क्रियासमापन्नो नरः शीघ्रं सुखी भवेत्॥

इति वसन्तोपचारः।

दीर्घवासरकं तीक्ष्णं ज्वालामालाकुलं जगत्।
दिशि दिशि मृगतृष्णा चोष्णं भृशं भवेद्रजः॥
नैरृतो मारुतो रूक्षः शीर्णपर्णा महीरुहाः।
दग्धं तृषाकुलारण्यं दावाग्निसङ्कुला दिशः॥
एवं लक्षणके ग्रीष्मे पित्तरक्तमुदीर्य्यते।
तस्मात् क्रियाप्रतीकारं कुर्य्यात् संशमनं भिषक्॥

सप्तविंशसमोऽहेश्च पञ्चाशदत्याप्य यः समाः॥
अरुगणो ब्रह्मचारीचेदित्येतदुत्तमं वयः॥
स्थूलोऽतिदीर्घः कठिनस्तथा श्रीमान् महोदयः।
इति तूत्तमवयसां ज्ञातव्यश्चोत्तमोत्तमः॥

इत्युत्तमवयः।

सप्तत्यूर्द्धमशीतिसीमप्राप्तं हीनबलं वयः।
तदूर्द्ध हीनहीनञ्च विज्ञेयो वयसः क्रमः॥

इति हीनवयः।

क्षीणोऽध्वश्रान्तः संखिन्नस्तथा रोगानुपीड़ितः।
कृतश्चातिकृशो ज्ञेयो बालसात्म्य उदाहृतः॥
सुकुमारोऽतिभीरुश्च मध्यकायःस्त्रियोऽपि वा।
मध्यसात्म्योऽपि विज्ञेयो मध्यमो वयसात्मकः॥
मध्यसात्म्यः पृथुः धीरो बलवान् सत्ववान्नरः।
सोऽप्यत्युत्तमसात्म्यः स्यादबलवन्त मुपाचरेत्॥
आषोड़शाद्भवेद्बालः पञ्चत्रिंशं युवा नरः।
मध्यमः सप्ततिं यावत् परतो वृद्ध उच्यते।
पञ्चवर्षा स्मृता बाला मुग्धा च षट्समावधिः।
द्वादशाब्दे स्मृता बाला मुग्धा स्यात् सप्तमावधिः॥
प्रौढ़ा च नववर्षाणि प्रगल्भा च त्रयोदश।

इति वयः।

अथातः संप्रवक्ष्यामि प्रकृतिज्ञानमुत्तमम्।
वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम्॥
कृष्णवर्णश्चपलोऽतिसूक्ष्मकेशोऽल्परूक्षो बलवान् कृशः स्यात्।
नोऽतिदन्तो नखवृद्धिमेति दीर्घस्तनश्चङ्क्रमणक्षमोऽसौ॥
र्घक्रमो लोलुप ऊनसत्त्वस्तथैव चाम्लादिकभोजनेच्छुः।

संस्वेदनेनातिविमर्दनेन सौख्यं समागच्छति वातलो ना ॥

इति वातप्रकृतिः ।

गौरोऽतिपिङ्गः सुकुमारमूर्त्तिः सितश्च पीतो मधुपिङ्गनेत्रः ।
तीक्ष्णोऽतिकोपः क्षणभङ्गुरश्च त्रासी मृदुर्गात्रपलीतकश्च ॥
जल्पप्रियस्तिक्तरसानुभोजी द्वेषी च तीक्ष्णेन स चोष्णसेवी ।
स्तुतिप्रियो दन्तविशुष्कवर्णो जातः सपित्तप्रकृतिर्मनुष्यः ॥

इति पित्तप्रकृतिः ।

सुस्निग्धवर्णः सितनेत्रदीर्घः श्यामः सुकेशो नखदीर्घरोमा ।
गम्भीरशब्दः शुनशाक्तनिद्रातन्द्राप्रियस्तिक्तकटूष्णभोजी ॥
सुमांसलः स्निग्धरसप्रियश्च सगीतवाद्योऽतिसहिष्णुचित्तः ।
व्यायामशीलो रतलालसोऽसौ भवेत् कफात्मप्रकृतिर्मनुष्यः ॥

इति कफप्रकृतिः ।

संमिश्रवर्णोऽतिमृदोमगात्रो गम्भीरघोषोऽतिविवर्णरोमा ।
समाप्रियो व्यायसहोऽतिमिश्रो भोगेन युक्तः स समः प्रकृत्या ॥

इति समप्रकृतिः ।

अथान्तरं वच्मि मरुत्प्रवाहं पूर्वं तथा पश्चिमदक्षिणादिम् ।
तेषां गुणान् दोषविकोपनं च पृथक् पृथक् मे गदतः शृणु त्वम् ।
शीतोऽनिलाधुर्य्यगुणप्रयुक्तो वातप्रकोपी बलकृद्विशेषात् ।
वाताधिकानां क्षयशोफिनाञ्च प्राचीप्रवृत्तः पवनो न शस्तः ॥
किञ्चित् सतिक्तो मधुरान्वितः स्यात् कफः समीरोद्भवरोगकारी ।
सुशीतलः शोफवतां व्रणानां शस्तो न चाग्नेयसमीरणश्च ॥
तिक्तः कषायो मधुरोऽतिमन्दः सुगन्धसंश्लिष्टगुणैः प्रकृष्टः ।
वदन्ति संज्ञां मलयानिलेति प्रकृष्टरामाजनचित्तहारी ॥
मनोभवस्य प्रकरो मरुत् स्यात् कफोद्भवः सम्भवति प्रचारः ।
न चातिशीतो न तथोष्णको वा शुभश्च याम्यां प्रभवः समीरः ॥
रूक्षो हि वातप्रशमः सदोष्णः वातास्रपित्तार्त्तिजि दोषकारी ।

ततो यत्नतो रक्षणीयं मनुष्यैः
शुभं चेदभीष्टं सदा रोगशान्तिम् ॥

इति वायुप्रकोपः।

अत्युष्णरूक्षाम्लकटुप्रदाहैः मिथोः सुरासेवनेनातिघर्मे।
क्रोधादपि खेदने च व्यवाये अभोजने याति कोपञ्च पित्तम् ॥

कुलत्थाढकी यूषमूलेषु शिग्रु-
तिलातसीराजिका शाकवृन्दे।
निशाजागरे योधने च श्रमे वा
घनान्ते शरत्सु प्रकोपः प्रदिष्टः ॥
भृशं वासरे मध्यगेऽर्के निशीथे
सुजीर्णे प्रभुक्ते प्रकोपः प्रदिष्टः।

इति पित्तप्रकोपस्य निदानम्।

निशाजागरे वासरे वातिसुप्ते सुशीतोदके सेविते शीतले च
पयःपानपीयूषकेक्षुतैलैस्तथा रञ्जनैः कन्दशाकैस्तथापि ॥
सदा सेवितैस्तु मत्स्यखण्डमत्स्यैर्मदैश्च माषैर्गुरुभिश्च पिच्छिलैः।
स्निग्धातिसंसेवने भुक्तिमात्रे प्रदिष्टः कफस्य प्रकोपो वसन्ते ॥

दिनान्ते प्रभाते निशान्ते नरस्य
भुक्तेऽप्यजीर्णे प्रकोपः प्रदिष्टः।
प्रदिष्टस्तथा कोविदैरेष रोगः
कफोत्पत्तिजन्योहि सः कष्टयोगः ॥
सशीतेऽथवा शीतकाले निशान्ते
नरस्य प्रकोपः प्रदिष्टोऽपि भुक्ते।
न जीर्णे प्रदिष्टस्तथा रोगवेगः
निदानं कफस्येति चोक्तं सुधीभिः ॥

इति कफप्रकोपः।

यदा विपर्य्यासगते ऋतौ च प्रकोपनं यस्य यथा प्रदिष्टम्।

कट्वम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफम्॥

एते रसा एतेषां दोषाणां विरुद्धाः।

क्रमेणैते रसा दोषानेतान् संजनयन्ति हि।
समीरणे तु नो देयाः कटुतिक्तकषायकाः।
पित्ते कट्वम्ललवणाः स्वाद्वम्ललवणाः कफे॥

एते दोषाणां दोषकराः।

स्वाद्वम्ललवणान् वाते तिक्तस्वादुकषायकान्।
पित्ते कफे तिक्तकटुकषायान् योजयेद्रसान्॥
योगादपि पुनर्दुष्टः अम्लेन लवणेन च॥
स्वादुस्तथा कषायेण मधुरं तिक्तकेन च।
क्षाराणां कटुभिः सार्द्धं तिक्तानाञ्च कषायकैः।
विरोधो मधुरेणाम्ले तद्यत्नेन विवर्जयेत्॥
मधुराम्लौ क्षारकटुकौ तिक्तकषायकौ चेत्येतावन्योन्य-रसविरोधिनौ भवेताम्।

अथ षण्णां रसानां रसवीर्य्यम्।

यः स्वादुः श्रमशोषहृच्च बलकृद्वीर्य्यप्रदः पुष्टिदः
प्रोल्लासं रसने करोति तदनु श्लेष्मप्रवृद्धिं नयेत्।
पित्तानां दमनः भ्रमोपशमनो वृष्यो नराणां हितः
क्षीणानां क्षतपाण्डुनेत्ररुज संहर्त्ता भवेद्वैरसः॥

इति मधुरवीर्य्यम्।

तिक्ताख्यो रस वातलोऽपि हि नृणां कुष्ठादि दोषापहः
सोऽस्तः सर्वरुजापहो भ्रमहरो रुच्योऽपि संक्लेदहृत्।
जिह्वास्फोटकनाशनोऽथ भवति क्षीणक्षतानां हितो
वक्त्रोत्क्रान्तिहरः प्रकृष्ट गुणभृत् निम्बादिकानां रसः॥

इति तिक्तवीर्य्यम्

नेत्रं स्रावयते मुखं विदहते कण्ठं समुद्वेजयेत्
बीभत्सं तनुते भ्रमञ्च विकुरुते पित्तासृजां कोपनम् ।
अग्नेर्दीपनकृत् व्रणं विदहते जीर्णेन शस्तो भवेत्
वातानाहरते कफञ्च दहते ह्येवं कटू रौद्रकः ॥

इति कटुरसवीर्य्यम् ।

जिह्वाक्लेदं जनयति तथा नेत्रनैर्मल्यकारी
बीभत्सं वा जनयति तथा वातरोगापहारी ।
कण्डूकुष्ठक्षतरुजकरो नो हितः शोफिनः स्या-
दम्लः प्रोक्तो मरुतशमनोऽसृक्प्रकोपं तनोति ॥

इति अम्लरसवीर्य्यम् ।

जिह्वा कण्ठं ग्रसति नितरां ग्राहकश्चातिसारे
श्लेष्मव्याधिरुपशमकरः श्वासकासापहर्त्ता ।
हिक्काशूलं हरति नितरां शोधनः स्याद्व्रणानां
प्रोक्तश्चायं समधिकगुणो नाम श्रेष्ठः कषायः ॥

इति कषायरसवीर्य्यम्

क्षारः क्लेदं जनयति मुखे स्यादुरुष्णो विदाही
गुल्मश्लेष्मारुचिभृशतृषामूत्रकृच्छ्रोषणश्च ।
आनाहं संजनयति पुनर्वह्निसन्धुक्षणः स्यात्
एवं प्रोक्तं विदितगुणकैः कोविदैः क्षारवीर्य्यम् ॥

इति क्षारवीर्य्यम् ।

इति षड्रसो नाम षष्ठोऽध्यायः ।

---

## सप्तमोऽध्यायः ।

अथातः संप्रवक्ष्यामि पानीयानि पृथक् पृथक् ।
समासेन शृणुष्व त्वं गुणानपि विपर्य्ययम् ॥
द्विविधं चोदकं प्रोक्तमान्तरिक्षं तथौद्भिदम् ।

आन्तरिक्षं तु द्विविधं गाङ्गं सामुद्रिकं पयः॥
तद्वच्चतुर्विधं प्रोक्तमन्तरीक्षसमुद्भवम्।
भूमौ निपतितं तच्च जातं चाष्टविधं जलम्॥
अम्बरस्थं च सामुद्रं वापीकूपोदकं तथा।
नदी तड़ागजं प्रोक्तं निर्झरं चौण्ड्रजं तथा॥
इति चाष्टविधं प्रोक्तं नवमं नारिकेलजम्।
गाङ्गसामुद्रविज्ञानं कथयिष्यामि साम्प्रतम्॥
धारितं येन पात्रेण लक्ष्यते तेन तद्विधम्॥
धौतं शुद्धं मितं वस्त्रं चतुर्हस्तप्रमाणकम्।
दण्डांस्त्रिहस्तांश्चतुरश्चतुष्कोणेषु बन्धयेत्॥
तस्मात् परीक्ष्यते तोयं शुद्धे रौप्यमयेऽथवा।
कांस्यपात्रे समुद्धृत्य परीक्षेत् भिषग्वरः॥
शुद्धकर्पासतूलं वा श्वेतशाल्योदनस्य वा।
पिण्डिका तत्र संक्षिप्ता नान्यथा भाति सा पुनः॥
श्वेता तु निर्मला पिण्डी शुद्धञ्च विमलं पयः।
तद्गाङ्गं सर्वदोषघ्नं गृहीत्वा हि सुभाजने॥
तद्धारयेच्च मतिमान् बल्यं मेध्यं रसायनम्।
श्रमक्लमपिपासाघ्नं कण्डूदोषनिवारणम्॥
लघु मूर्च्छातृषाच्छर्दिमूत्रस्तम्भविनाशनम्।
गङ्गोदकस्य वृष्टिः स्याद्दिवसे वा प्रदोषतः॥

इति गाङ्गोदकपरीक्षा।

आविलं समलं नीलं घनं पीतमथापि च।
सक्षारं पिच्छिलं चैव सामुद्रं तन्निगद्यते॥
सघनं कफकृत्तच्च कण्डूश्लीपदकारकम्।
तद्वातलं च विज्ञेयं रक्तदोषार्त्तिकारणम्॥

इति सामुद्रोदक।

इति द्विधोदकं प्रोक्तं तथा वक्ष्ये चतुर्विधम्।
शरदि निपतेद् भूमौ कराम्बु वर्षतो रवेः॥
मेघा वमन्ते यत्तोयं सशैलवनकानने।
रात्रिवृष्टिर्दिवावृष्टिर्दुर्दिनादि क्षणोद्भवः॥
निशाजलं कफकरं घनं शीतगुणात्मकम्।
सामुद्रतोयेन समं विज्ञेयं वातकोपनम्॥
दिवा सूर्य्यांशुतप्ताश्च मेघा वर्षन्ति यत्पयः।
तत्कफघ्नं पिपासाघ्नं लघुवातप्रकोपनम्॥
दुर्दिने वृष्टिसम्भूतं वातभूतश्च वातलम्।
कफकृच्छोषहननं तर्पणं दोषकोपनम्॥
तथा श्रावणवृष्टिश्च दोषरोगकरी नृणाम्।
किन्तु त्रिदोषजननं पानीयं न प्रशस्यते॥

इति श्रावणवृष्टिगुणाः।

सघनं नाभसं नीरं स्रोतः स्नक्तद्वातकोपनम्।
शमनं पित्तरोगाणां मधुरं रक्तदोषकृत्॥

इति भाद्रपदवृष्टिगुणाः।

रूक्षं पित्तकरं चाम्लं गुल्मरक्तविकारकृत्।
चित्रानक्षत्रसम्भूतं सर्वशस्यविदोषकृत्॥

इति आश्विनवृष्टिगुणाः।

कार्त्तिके वृष्टिसम्भूतं नातिसन्तापि शीतलम्।
नाशनं च त्रिदोषाणां सर्वशस्यप्रवर्द्धनम्॥
शीतलं बलकृद्हृद्यं त्रिदोषज्वरनाशनम्।
क्वचित् पुण्यतरे देशे शरद्वर्षान्विता भवेत्॥
पित्तज्वरविनाशाय शस्यनिष्पत्तिहेतवे।
अम्बरस्थं सदा पथ्यममृतं स्वातिसम्भवम्॥
शयनाम्बु त्रिदोषघ्नं गृहीतं यच्च भोजने।

बल्यं रसायनं मेध्यं पात्रापेच्यं ततः परम् ॥
प्रवृत्तायां शरद्यस्मात् पश्चाद्वाते प्रवाति च।
हेमन्ते चापि गृह्णीयात्तज्जलं मृण्मयैर्घटैः ॥
अनार्त्तवं विमुञ्चन्ति जलं जलधरास्तु यत्।
पतितं तत् त्रिदोषाय सर्वेषां देहिनामपि ॥
कार्त्तिक्यादिचतुर्णान्तु मासानां कीर्त्तिता गुणाः ॥

इति कार्त्तिकवृष्टिगुणाः। इति चातुर्मासिक जलम्।

अकाले वृष्टिसम्पातसम्भृतं तद्विकारकृत्।
विशेषात् श्लेष्मरोगाणां कारणं न प्रशस्यते ॥

अथान्यचतुर्विधं जलं व्याख्यायते।

तथा धारञ्च कारञ्च तौषारं हैममेव च।
चतुर्विधं समुद्दिष्टं तेषां वच्मि गुणागुणान् ॥
धारं चतुर्विधं प्रोक्तं वच्ये कारं महामते!।
श्रीमतामथ प्राज्ञानां हिताय रोगशान्तये ॥
स्वर्णद्याः शीतवातेन मेघविस्फूर्जसङ्कुलम्।
शीताम्बु कठिनं भूत्वा शिलं जातं हिमेन तु ॥
पश्चात् सूर्य्यांशुसन्तापात् किञ्चिद्वै द्रवते जलम्।
वमन्ति सलिलं मेघाः सकलं शीतलं मतम् ॥

इति कारकोत्पत्तिः।

कारं शीतगुणैः श्रमोपशमनं शोषार्त्तिनिर्नाशनम्।
हिक्कायाश्च वमिनिवारणकरं शोफव्रणानां पुनः ॥
निःशेषेण विशेषदोषशमनं पित्तात्मिकानां हितम्।
शंसन्ति प्रवरा गुणैः प्रतिकृतं तस्मान्न दूरं कृतम् ॥

इति कारकजलगुणाः।

तौषारं लघु शीतलं श्रमहरं पित्तार्त्तिशान्तिप्रदं
दोषाणां शमनं जलार्त्तिहननं सर्वामयघ्नं परम्।

कुष्ठश्लीपदचर्च्चिकाविषहरं पामाविसर्पापहं
क्षीणानां क्षतशोषिणां हितकरं संसेव्यते मानवैः ॥

इति तुषारपानीयगुणाः।

हैमं घनञ्च मधुरञ्च कफात्मकञ्च
मूर्च्छाभ्रमार्त्तिशमनं श्रमनाशनञ्च।
पित्तासृजां प्रशमनं रुधिरक्षयादौ
शान्तिं करोति हिमसम्भववारि सद्यः ॥

इति हैमपानीयगुणाः।

इति धारकारतौषारहैमजलगुणाः।

...ार पृथिव्यां पतितं पयस्तु तत्रैव जातं गुणभेदभिन्नम्।
...नानाविधैर्भेदगुणैश्च सम्यग् जातं जलं चाष्टविधं वदन्ति ॥
...नादौद्भिदं प्रास्रवणञ्च चौण्ड्रं कौपं तडागात् सरसोभवञ्च।
...ाप्युद्भवं तत् प्रवदन्ति धीरा नीरं समासेन निगद्यतेऽत्र ॥
...ात् सौमताञ्चैव महायतीनां सेव्यं तथा भोग्यतमं प्रदिष्टम्।
...ादाम्बुमाधुर्य्यगुणं लघु स्याद्रूक्षं तथोष्णं शमनञ्च वायोः ॥
...न्दीपनं नन्दनमत्र शस्तं हिमागमे वा शिशिरे च सेव्यम्।

इति नदेयवारिगुणाः।

...ौद्भिल्लघूष्णं खलु वातहारि सपित्ततृष्णाज्वरनाशनञ्च।
...ष्ठव्रणानां श्रमशोषिणाञ्च शस्तं न च क्षारगुणोपपन्नम् ॥

इति औद्भिदवारिगुणाः।

...ष्णं कषायं स्रवणोद्भवञ्च श्लेष्मापहं गुल्महृदामयघ्नम्।
...र्शोविसर्पक्षयरोगहारि नानाविधं दोषलयं करोति ॥

इति प्रस्रवणवारिगुणाः।

...दन्ति चौण्ड्रं लवणं गुरुत्वभाक् कफात्मकं वारि विकारकारि
...ृक्का ज्वरं शूलमरोचनञ्च करोति नूनं त्वचि दोषरोगम् ॥

इति चौण्ड्रोदकगुणाः।

क्षारं कवोष्णं कफवातरोगविनाशनं पित्तकरं कटुत्वात्।
तस्मात् सदा पित्तविकारिणाञ्च शस्तं न वाप्यं शरदो वदन्ति

इति वार्प्योदकगुणाः।

रूक्षं कफघ्नं लवणात्मकञ्च सन्दीपनं पित्तकरं लघूष्णम्।
कूपोदकं वातहरं प्रदिष्टं हितं न शस्तं शरदो वदन्ति॥

96293

इति कूपोदकगुणाः।

घनं कषायञ्च तड़ागजं स्यात् विपाचकं तन्मधुरं तथैव।
शरत्सु शस्तं कफकृद्धि वातलं ग्रीष्मे हितं तत् प्रवदन्ति धीराः

इति तड़ागोदकगुणाः

क्षारं घनं वातकफानुकारि त्वग्दोषकृत्तत् कटुदीपनञ्च।
प्रोक्तं विपाके भ्रमशोपकारि स्यात् सारसं नो सुखकारि वारि

इति सारसवारिगुणाः।

इति चाष्टविधं प्रोक्तं जलं भेषजवित्तमैः।
नादेयं संप्रवक्ष्यामि सदा स्रोतोऽधिवेगजम॥
तथा प्राच्यां गमाश्चान्याः पश्चिमानुगमास्तथा।
तेषां गुणागुणं वक्ष्ये समासेन गुणोत्तम!॥
ससैकता सपापाणा द्विविधा चाम्बुवाहिनी।
एवं चतुर्विधा नद्यो वातपित्तकफात्मिकाः॥

सदावहा वा घनवारिकोष्णा मरुत् कफानां शमनञ्च तस्याः
नीरं वसन्ते हितकृद् विशेषात् नदीभवं नैव हिमागमे च॥

घनविमलशिलानां स्फालनाज्जातफेनं
बहुलसजलवीचिच्छन्नसंक्षोभदृष्टम्।
ननु लघु च सुशीतं नैव चोष्णं घनञ्च
हरति पवनपित्तं श्लेष्मकृद्वारि सम्यक्।

इति सपाषाणनदीवारिगुणाः।

न घनविमलतोयं सैकतायाः प्रवाहे
न च भवति लघुत्वं श्लेष्मकृद्धन्ति पित्तम्।

स्नाने पाने न तत् शस्तं नराणां वाह्यवेषु च ॥
स्नानेन त्वग्गतं रोगं कण्डुकुष्ठविसर्पकम्।
पानेन कफगुल्माद्यान् कृमिजान् रससम्भवान्।
करोति विविधान् रोगान् तस्मात् तं परिवर्जयेत् ॥

इति पार्ष्णोदकगुणाः।

विरूक्षौ तृणनीलिका विषयुतं तप्तं घनं फेनिलम्।
दन्तग्राह्य मनार्त्तवं हि सलिलं दुर्गन्धि वै गर्हितम् ॥
नानाजीवविमिश्रितं गुरुतरं पर्णौघपङ्काविलम्।
चन्द्रार्कांशुसुगोपितं न च पिबेन्नीरं सुदोषान्वितम् ॥
बहुवृक्षलताकुञ्जच्छायः कूपोऽथवा सरः।
अव्ययं चाप्यधस्तोयं कृमिशैवालसंयुतम् ॥
क्लिन्नं सपिच्छलं कृष्णं वृक्षमूलाश्रितं च यत्।
बहुपर्णसमायुक्तं दुर्गन्धं मूत्रगन्धवत् ॥
रोगोदकं विजानीयात् करोति विषमान् गदान्।
गुल्मप्लीहार्शः पाण्डुंश्च जलं वापि जलोदरम् ॥
शूलं कुष्ठञ्च कण्डुञ्च सेवितेन करोति हि।

इति रोगोदकगुणाः।

दिवासूर्य्यांशुसन्तप्तं रात्रौ चन्द्रांशुशीतलम्।
अंशूदकमिति ख्यातं सर्वरोगनिवारकम् ॥
कफमेदोऽनिलघ्नञ्च दीपनं वस्तिशोधनम्।
श्वासकासहरं नीरं चक्षुष्यं नेत्ररोगहृत् ॥

इति अंशूदकगुणाः।

पादशेषन्तु क्वथितं तच्चारोग्यजलं विदुः।
कासश्वासहरं पथ्यं मारुतञ्चापकर्षति ॥
सद्यो ज्वरं हरत्याशु भेदकञ्च कफापहम्।
प्रतिश्यायं पाचयति शूलगुल्मार्शनाशनम् ॥

भोजनोर्द्धञ्च क्रमते शतपादं शनैः शनैः ॥
पश्चादुत्तानशयनं ततो वामे क्षणं शयेत्।
भुक्तोपरि समाचम्य मार्जयेद्दक्षिणौ करैः ॥
पुनर्दक्षिणहस्तेन मार्जयेदुदरं सुधीः।
उद्गीरयेत् समुद्गारं नचोद्गारस्य धारणम् ॥
व्यायामञ्च व्यवायञ्च धावनं पानमेव च।
युद्धं गीतञ्च पाठञ्च क्षणं भुक्ता विवर्जयेत् ॥
न सद्यः पीते पठनं गमनं न च कारयेत्।
न यानवाहनारोहं विवादं न च कारयेत् ॥
दिवास्वापं न कुर्य्यात्तु भुक्तोपरि च विश्रमेत्।
अकालशयनात् श्लेष्मा प्रतिश्यायः प्रपीनसः ॥
क्षयः शोफः शिरोऽर्त्तिश्च जायते चाग्निमन्दता।
मन्दपीते परिश्रान्ते हिक्काश्वासातुरेषु च ॥
भयशोकक्षुधार्त्तानां पठनान्मैथुनेन च।
व्यवाये वृद्धबाले च भाराक्रान्ते तथातुरे ॥
अतीसारे तु शोषे च तृष्णापानात्ययेऽपि च।
ग्रीष्मे वाल्ये निशाद्दष्टे दिवास्वप्नं हितं भवेत् ॥

इति द्वादशोऽध्यायः

इति श्रीमहर्षिवियभाषिते हारीतोत्तरे अन्नपानादिकं नाम
प्रथमस्थानं समाप्तम्।

---

क्षौद्रेण पिप्पलीचूर्णं लिह्यात् श्लेष्मज्वरापहम्।
प्लीहानाहविबन्धार्त्तिकासश्वासविमर्दनम्॥

इति श्लेष्मज्वरचिकित्सा।

तृष्णा मूर्च्छा वमिरथ कटुकं चानने रूक्षता स्यात्
अन्तर्दाहो वपुषि नयने पीतता कण्ठशोषः।
निद्रानाशःश्वसनशिरसोरुक् प्रमेहोऽङ्गभङ्गो
रोमोद्धर्षं तमकमिति चेद्वातपित्तज्वरः स्यात्॥

संसृष्टरोपैर्विहितञ्च सम्यक् विपाचनं पित्तमरुज्ज्वरे च।
फलत्रिकं शाल्मलिसंप्रयुक्तं रास्ना किरातस्य पिबेत् कषायम्॥
द्विपञ्चमूली मह नागरेण रास्नाकिरातस्य पिबेत् कषायम्।
द्विपञ्चमूली मह नागरेण गुडूचिभूनिम्बघनैः समेता॥
कल्कः प्रशस्तः सगुडो मरुत्सु सपित्तवातज्वरनाशहेतुः।
किराततिक्तामलकीशठीना द्राक्षापर्णानामयकामृताभिः॥
क्वाथः सुशीतो गुड़संयुतः स्यात् सपित्तवातज्वरनाशहेतुः।
मसूरिकानाशनकं जलेन द्राक्षावलाकिन्नरुहा च रास्ना।
सदायमाणा कथितोऽपि यूषो सकलसपित्तज्वरनाशहेतुः।
अमृतामुस्तक वासा पर्पट विश्वाजलेन क्वाथः।
पानं पित्तमरुत्सु ज्वरं निहन्याच्च भद्रमुस्तः॥

इति वातपित्तज्वरचिकित्सा।

निद्रागौरवगात्रसन्धिशिरसशान्तिस्तथा पर्वणाम्
भेदो मध्यमवेगमत्र नयने वातान्विते श्लेष्मणि
सन्तापः श्वसनं रुचिः श्रुतिपथे कण्ठे च शुष्कावृति
स्तन्द्रामोहमरोचकभ्रममथ श्लेष्मज्वरे पित्तले॥
किरातं पर्पटं मुस्तं गुडूची विश्वभेषजम्।
पित्तश्लेष्मज्वरे कुर्य्यात् पाचनं ज्वरनाशनम्॥
नागरं भद्रमुस्ता वा गुडूच्यामलकाह्वयम्।

हारीतेन यथा प्रोक्ता काकमाची सुपूजिता।
आलोक्यानेकशास्त्राणि आत्रेयेणापि पूजिता॥

जम्बूत्वचं वत्सकवल्कलञ्च निःक्वाथ्य नूनं सलिलेषु सम्यक्।
चतुर्विभागेष्वपि शोषितेषु उत्तार्य्य वस्त्रेष्वथ गालयेच्च॥

पुनः कटाहे विपचेच्च सम्यक् दर्व्यां प्रलेपः स्वरसस्तु यावत्।
उत्तार्य्य शीते मधुना विमिश्रं लीढं हरेदप्यतिसारमुग्रम्॥

कुक्षौ तथा वक्षसि नाभिदेशे पायुप्रदेशे सततं निरुद्धे।
वातस्य रोधो हि शकृद्विभङ्गो भवन्ति सर्व्वेष्वतिसारकेषु॥

सफेनिलं पिच्छलमेव रूक्षमल्पं शकृद्वाथ सशब्दशूलम्।
गात्रं भवेत् कृष्णविचेष्टनञ्च वातातिसारं प्रवदन्ति तज्ज्ञाः॥

तस्यादौ लङ्घनञ्चैकमल्पं वा नैव लङ्घनम्।
तस्माद्देयं कषायन्तु पानभोजनमेव च॥

उदीच्य धान्यस्य जलेन कल्कं पानं हितं पाचयतेऽतिसारम्
तृष्णापहं दाहविनाशनञ्च सशूलहिक्कासु विनाशनं स्यात्॥

बालद्वयं मोचहरीतकी च सपर्पटं नागरकं जलेन।
क्वाथपानमतिसारके नृणां नाशमाशु कुरुते मलशान्तिम्॥

शालिपर्णी पृश्निपर्णी बृहती कण्टकारिका।
बालाश्वदंष्ट्राबिल्वानि पाठानागरधान्यकम्॥

एतदाहारसंयोगि हितं सर्व्वातिसारिणाम्।
तिन्दुकत्वचमाहृत्य काश्मरीपत्रवेष्टितम्॥

मृदा विलिप्य विधिवद्दहेन्मृद्वग्निना भिषक्।
रसं गृहीत्वा सक्षौद्रं सर्व्वातिसारनाशनम्॥

इति वातातिसार.

घर्म्मेण चोष्णान्नविभोजनेन घर्म्मेण तप्तोदकसेवनेन।
शोकेन तापेन रुषा कटुत्वे क्षारेण पित्तासृजि सारकः स्यात्॥

तेनारुणं पीतमथातिनीलं दुर्गन्धशोषज्वरपाण्डुयुक्तम्।

## त्रिपञ्चाशत्तमोऽध्यायः ।

### अथ बालचिकित्सा ।

आत्रेय उवाच ।

पञ्चैव चीरदोषाश्च स्त्रीणाञ्च कथिता बुधैः ।
घनचीरोष्णचीराम्लचीरा चैव तथापरा ॥
अल्पचीरा मृदुचीरा चारचीरा तथापरा ।
मृदुचीरा भवेत् सौख्या पञ्चान्या दोषकारकाः ॥
घनाध्माननिरोधत्वं श्वासकासादिसम्भवः ।
उत्फुल्लकुच्चितावंचिघनचीरस्य सेवनात् ॥
अल्पमलः कृशो दीनः श्वासातिसारपीड़ितः ।
अल्पचीरस्य दोषेण सम्भवेद्गतवाक् सुतः ॥
ज्वरः शोपस्तथाल्पत्वमुष्णचीरेण बालके ।
तथैव चोष्णचीरेण ज्वरातिसार एव च ॥
सुखञ्च बलमाप्नोति चारोग्यं लभते शिशुः ।
मृदुचीरेण नियतं जायते रूपवानपि ॥
चचूरोगश्च कण्डूश्च चतश्लेष्मावशूलिता ।
मंक्लेदयुक्तं नासास्यं जायते चारदुग्धके ॥
अतो वच्यामि भेषज्यं शृणु हारीत ! मे मतम् ।
आध्मानात् फुल्लकुच्चिश्च श्वासदोषादिपीड़ितः ॥
उत्फुल्लिका च विज्ञेया बालानां दुःखकारिणी ।
उदरे च जलौकादिरक्तं चादौ विमोचयेत् ॥
उत्फुल्लिदोषे दातव्यं चीरदोषनिवारणम् ।
अग्निना प्रबलः स्वेदो दहेद्वापि शलाकया ॥
जठरे विन्दुकाकारा जायन्ते भिषगुत्तम ! ।
बिल्वमूलफलं पाठा त्रिकटुर्वृहतीद्वयम् ॥
क्वाथश्च गुड़युक्तश्च बालानाञ्च ज्वरे हितः ।

